अग्निमग्निं॒ हवीमभिः सदा हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम्। तꣳ शश्वन्त ईडते स्रुचा देवं घृतश्चुता। अग्निꣳ हव्याय वोढवे। अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाꣳ रेताꣳसि जिन्वति। त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः। अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः। मूर्धा कवी रयीणाम्। भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः। दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहम्। अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम्। यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ। अवोचाम कवये मेध्याय

वचो वन्दारु वृषभाय वृष्णे । गविष्ठिरो नमसा स्तो-
ममग्नौ दिवीव रुक्ममुर्व्यञ्चमश्रेत् । जनस्य गोपा
अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भर-
तेभ्यः शुचिः । त्वामग्ने अङ्गिरसो गुहाहितमन्व-
विन्दञ्छिश्रियाणं वनेवने । स जायसे मथ्यमानः
सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः । यज्ञस्य
केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समि-
न्धते । इन्द्रेण देवैः सरथं स बर्हिषि सीदन्नि-
होता यजथाय सुक्रतुः । त्वां चित्रश्रवस्तम हवन्ते
विक्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे ।

सखायः सं वः सम्यञ्चमिषꣳ स्तोमं चाग्नये । वर्षिष्ठाय
क्षितीनामूर्जो नप्त्रे सहस्वते । सꣳ समिद्युवसे वृषन्न-
ग्ने विश्वान्यर्य आ । इडस्पदे समिध्यसे स नो वसून्या-
भर । एना वो अग्निं नमसोर्जो न पातमा हुवे । प्रियं
चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतम् ।
स योजते अरुषो विश्वभोजसा स दुद्रवत्स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी वसूनां देवꣳ राधो जनानाम् ।
उदस्य शोचिरस्थादाजुह्वानस्य मीढुषः । उद्धू-
मासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः ।
अग्ने वाजस्य गोमत ईशानः सहसो यहो । अ-
स्मे धेहि जातवेदो महि श्रवः । स इधानो वसु-

ष्कविरग्निरीडेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक
दीदिहि । क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः
स तिग्मजम्भ रक्षसो दह प्रति । आ ते अग्न इधी-
महि द्युमन्तं देवाजरम् । यद्ध स्या ते पनीयसी
समिद्दीदयति द्यवीषꣳ स्तोतृभ्य आ भर । आ ते
अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते । सुश्चन्द्र
दस्म विश्पते हव्यवाट् तुभ्यꣳ हूयत इषꣳ स्तो-
तृभ्य आ भर । उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष
आसनि । उतो न उत्पुपूर्या उक्थेषु शवसस्पत
इषꣳ स्तोतृभ्य आ भर । अग्ने तमद्याश्वं न स्तोमैः
क्रतुं न भद्रꣳ हृदिस्पृशम् । ऋध्यामा त ओहैः ।

अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः। रथीर्ऋतस्य
बृहतो बभूथ। आभिष्टे अद्य गीर्भिर्गृणन्तोऽग्ने दा-
शेम। प्र ते दिवो न स्तनयन्ति शुष्माः। एभिर्नो अ-
र्कैर्भवा नो अर्वाङ् सुवर्न ज्योतिः। अग्ने विश्वेभिः
सुमना अनीकैः। अग्निꣳ होतारं मन्ये दास्वन्तं वसोः
सूनुꣳ सहसो जातवेदसम्। विप्रं न जातवेदसम्।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा। घृतस्य
विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः।
अग्ने त्वं नो अन्तमः। उत त्राता शिवो भव वरूथ्यः।
तं त्वा शोचिष्ठ दीदिवः। सुम्नाय नूनमीमहे सखि-
भ्यः। वसुरग्निर्वसुश्रवाः। अच्छा नक्षि द्युमत्तमो
रयिं दाः॥

यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम्।
यस्मै त्वꣳ सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम्।अ-
श्विनꣳ स पुत्रिणं वीरवन्तं गोमन्तꣳ रयिं नशते स्वस्ति।
त्वे सु पुत्र शवसोऽवृत्रन् कामकातयः। न त्वामिन्द्राति
रिच्यते। उक्थ उक्थे सोम इन्द्रं ममाद नीथेनीथे
मघवानꣳ सुतासः। यदीꣳ सबाधः पितरं न पुत्राः समान
दक्षा अवसे हवन्ते। अग्ने रसेन तेजसा जातवेदो विरोचसे।
रक्षोहाऽमीवचातनः।अपो अन्वचारिषꣳ रसेन सम-
सृक्ष्महि। पयस्वाꣳ अग्न आगमं तं मा सꣳसृज वर्चसा।
वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः। स्याम ते सुमता-
वपि। त्वामग्ने वसुपतिं वसूनामभि प्र मन्दे अध्व...

राजन्। त्वया वाजं वाजयन्तो जयेमाभि ष्याम पृत्सुती-
र्मर्त्यानाम्। त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम्।
स नो रास्व सुवीर्यम्।अयं नो अग्निर्वरिवः कृणोत्वयं
मृधः पुर एतु प्रभिन्दन्। अयँ शत्रूञ्जयतु जर्हृ-
षाणोऽयं वाजं जयतु वाजसातौ।अग्निनाग्निः समि-
ध्यते कविर्गृहपतिर्युवा। हव्यवाड् जुह्वास्यः। त्वँ
ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता। सखा सख्या
समिध्यसे। उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते।
तव ज्योतीँष्यर्चयः। विज्योतिषा बृहता भात्यग्निरावि-
र्विश्वानि कृणुते महित्वा। प्रादेवीर्मायाः सहते दुरेवाः
शिशीते शृङ्गे रक्षसे विनिक्षे॥

दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जा-
तवेदाः। तृतीयमप्सु नृमणा अजस्रमिन्धान एनं
जंरते स्वाधीः। विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते
सद्म विभृतं पुरुत्रा। विद्मा ते नाम परमं गुहा यद्विद्मा
तमुत्सं यत आजगन्थ। समुद्रे त्वा नृमणा अप्स्वन्तर्नृ-
चक्षा ईधे दिवो अग्न ऊधन्। तृतीये त्वा रजसि तस्थि-
वाँसमृतस्य योनौ महिषा अहिन्वन्। अक्रन्ददग्निः स्त-
नयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्। सद्यो
जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भा-
त्यन्तः। उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निर-
मृतो नि धायि। इयर्त्ति धूममरुषं भरिभ्रदुच्छुक्रेण
शोचिषा द्यामिनक्षत्। विश्वस्य केतुर्भुवनस्य गर्भ

आ रोदसी अपृणाज्जायमानः। वीडुं चिदद्रिमभिनत्प-
रायञ्जना यदग्निमयजन्त पञ्च। श्रीणामुदारो धरुणो
रयीणां मनीषाणां प्रार्पणः सोमगोपाः। वसोःसूनुः सहसो
अप्सु राजा वि भात्यग्र उषसामिधानः। यस्ते अद्य कृ-
णवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने। प्र तं नय
प्रतरं वस्यो अच्छाभि द्युम्नं देवभक्तं यविष्ठ। आ तं
भज सौश्रवसेष्वग्न उक्थ उक्थ आ भज शस्यमाने।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्ज-
नित्वैः। त्वामग्ने यजमाना अनु द्यून् विश्वा वसूनि
दधिरे वार्याणि। त्वया सह द्रविणमिच्छमाना व्र-
जं गोमन्तमुशिजो वि वव्रुः। दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्ष-
मायुः श्रिये रुचानः। अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः॥

अग्नेऽभ्यावर्तिन्नभि न आ वर्तस्वाऽऽयुषा वर्चसा सन्या मेधया प्रजया धनेन ॥ अग्ने अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः। तासां पोषस्य पोषेण पुनर्नो नष्टमा कृधि पुनर्नो रयिमाकृधि। पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा। पुनर्नः पाहि विश्वतः। सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्निया विश्वतस्परि। आ त्वाऽहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः। विशस्त्वा सर्वा वाञ्छन्त्वस्मिन् राष्ट्रमधि श्रय। अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषागात्। अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः। सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान्। मैनामर्चिषा मा तपसाभि शूशु-

चोऽन्तरस्यां शुक्रज्योतिर्वि भाहि। अन्तरग्ने
रुचा त्वमुखायै सदने स्वे। तस्यास्त्वं हरसा तप-
ञ्जातवेदः शिवो भव। शिवो भूत्वा मह्यमग्नेऽथो
सीद शिवस्त्वम्। शिवाः कृत्वा दिशः सर्वाः स्वां यो-
निमिहाऽऽसदः। हंसः शुचिषद्वसुरन्तरिक्षसद्धो-
ता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्यो-
मसद्ब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः।
प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे।
उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः। स नो भव
शिवतमः सुप्रतीको विभावसुः। प्रेदग्ने ज्योतिष्मान्

याहि शिवेभिरर्चिभिस्त्वम्। बृहद्भिर्भानुभिर्भा-
सन् मा हिꣳसीस्तनुवा प्रजाः। समिधाग्निं दुवस्यत
घृतैर्बोधयतातिथिम्। आस्मिन् हव्या जुहोतन।
प्र प्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोच-
ते बृहद्भाः। अभि यः पूरुं पृतनासु तस्थौ दीदा-
य दैव्यो अतिथिः शिवो नः। आपो देवीः प्रति
गृह्णीत भस्मैतत्स्योने कृणुध्वꣳ सुरभावु लोके।
तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृ-
ता स्वेनम्। अप्स्वग्ने सधिष्टव सौषधीरनुरु-
ध्यसे। गर्भे सञ्जायसे पुनः। गर्भो अस्योषधी-
नां गर्भो वनस्पतीनाम्। गर्भो विश्वस्य भूतस्या-

ग्ने गर्भो अपामसि । प्रसद्य भस्मना योनिमपश्च पृ-
थिवीमग्ने । सꣳसृज्य मातृभिस्त्वं ज्योतिष्मान् पु-
नराऽसदः । पुनरासाद्य सदनमपश्च पृथिवीम-
ग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्याꣳ शिवतमः पु-
नरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि
विश्वतः । सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया ।
विश्वप्स्न्या विश्वतस्परि । पुनस्त्वादित्या रुद्रा
वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तनुवो वर्धयस्व सत्याः सन्तु यजमान-
स्य कामाः । बोधा नो अस्य वचसो यविष्ठ मꣳ-
हिष्ठस्य प्रभृतस्य स्वधावः । पीयति त्वो अनु

त्वो गृणाति वन्दारुस्ते तनुवं वन्दे अग्ने। स बोधि
सूरिर्मघवा वसुदावा वसुपतिः। युयोध्यस्मद्द्वेषाꣳसि॥
संं या वः प्रियास्तनुवः सं प्रिया हृदयानि वः। आ
त्मा वो अस्तु सम्प्रियः सम्प्रियास्तनुवो मम। अयꣳ सो
अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः।
सहस्रियं वाजमत्यं न सप्तिꣳ ससवान्त्सन्त्स्तूयसे जा-
तवेदः। अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाꣳ ऊ-
चिषे धिष्णिया ये। याः परस्ताद्रोचने सूर्यस्य याश्चा-
वस्तादुपतिष्ठन्त आपः। अग्ने यत्ते दिवि वर्चः पृथि-
व्यां यदोषधीष्वप्सु वा यजत्र। येनान्तरिक्षमुर्वा-
ततन्थ त्वेषः स भानुरर्णवो नृचक्षाः। पुरीष्यासो अ-

ग्नयः प्रावणेभिः सजोषसः। जुषन्ताꣳ हव्यमाहुतमन-
मीवा इषो महीः। इडामग्ने पुरुदꣳसꣳ सनिं गोः शश्व-
त्तमꣳ हवमानाय साध। स्यान्नः सूनुस्तनयो विजावा-
ग्ने सा ते सुमतिर्भूत्वस्मे। अयं ते योनिर्ऋत्वियो यतो
जातो अरोचथाः। तं जानन्नग्न आरोहाथा नो वर्धया रयिम्।

अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु
प्रभिन्दन्। अयꣳ शत्रूञ्जयतु जर्हृषाणोऽयं वाजं ज-
यतु। वाजसातौ ॥❀॥ यदन्तरिक्षं पृथिवीमुत द्यां
यन्मातरं पितरं वा जिहिꣳसिम। अग्निर्मा तस्मादे-
नसो गार्हपत्यः प्र मुञ्चतु दुरिता यानि चकृम
करोतु मामनेनसम् ॥❀॥

स प्रत्नवन्नवीयसाऽग्ने द्युम्नेन संयता। बृहत्ततन्थ भानुना। नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि। अग्निर्भुवद्रयिपती रयीणाᳬ सत्रा चक्राणो अमृतानि विश्वा। हिरण्यपाणिमूतये सवितारमुपह्वये। स चेत्ता देवता पदम् ॥❀॥

अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य धाम। याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ॥

प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः। यस्य त्वᳬ सख्यमाविथ। प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत्। विपां ज्योतींᳬषि बिभ्रते न वे-

धसे । अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जि-
ह्वा ऋतजात पूर्वीः। तिस्र उ ते तनुवो देववाता-
स्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥❀॥ त्रीण्यायूꣳ-
षि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने। ता-
भिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः।
अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः। स त्रीꣳरे-
कादशाꣳ इह। यक्षच्च पिप्रयच्च नो विप्रो दूतः परि-
ष्कृतः। नभन्तामन्यके समे ॥❀॥ अग्ने तेजस्विन्
तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मामायुष्मन्तं व-
र्चस्वन्तं मनुष्येषु कुरु दीक्षायै च त्वा तपसश्च तेजसे
जुहोमि तेजोविदसि तेजो मा मा हासीन्माहं तेजो हा-
सिषं मा मां तेजो हासीत् ॥

वैश्वानरो न ऊत्याऽऽ प्र यातु परावतः। अग्निरुक्थे-
न वाहसा। ऋतावानं वैश्वानरमृतस्य ज्योतिषस्प-
तिम्। अजस्रं घर्ममीमहे। वैश्वानरस्य दꣳस-
नाभ्यो बृहदरिणादेकः स्वपस्यया कविः। उभा
पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेत-
सा। पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओ-
षधीरा विवेश। वैश्वानरः सहसा पृष्टो अग्निः स
नो दिवा स रिषः पातु नक्तम्। जातो यदग्ने भुवना
व्यख्यः पशुं न गोपा इर्यः परिज्मा।

द्वौ समुद्रौ विततावजूर्यौ पर्यावर्तेते जठरेव पादाः।
तयोः पश्यन्तो अति यन्त्यन्यमपश्यन्तः सेतुनाति य-
न्त्यन्यम्। द्वे द्रधसी सतती वस्त एकः केशी वि-
श्वा भुवनानि विद्वान्। तिरोधायैत्यसितं वसानः शु-
क्रमा दत्ते अनुहाय जार्यै ॥३॥

अपाम सोममभृता अभूमादर्श्म ज्योतिरविदाम
देवान्। किमस्मान् कृणवदरातिः किमु धूर्तिरमृत
मर्त्यस्य ॥ यन्म आत्मनो मिन्दाऽभूदग्निस्तत् पुनराऽ-
हार्जातवेदा विचर्षणिः। पुनरग्निश्चक्षुरदात्पुनरिन्द्रो बृह-
स्पतिः। पुनर्मे अश्विना युवं चक्षुरा धत्तमक्ष्योः। आपूर्याः
स्थाऽऽमा पूरयत प्रजया च धनेन च ॥४॥

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनि-

रेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमम्।

यत्कुसीदमप्रतीत्तं मयि येन यमस्य बलिना चरामि। इहैव सन् निरवदये तदेतत्तदग्ने अनृणो भवामि। विश्वलोप विश्वदावस्य त्वाऽसञ्जुहोम्यग्धादेकोऽहुतादेकः समसनादेकः। ते नः कृण्वन्तु भेषजꣳ सदः सहो वरेण्यम्। अयं नो नभसा पुरः सꣳस्फानो अभि रक्षतु। गृहाणामसमर्त्यै बहवो नो गृहा असन्। स त्वं नो नभसस्पत ऊर्जं नो धेहि भद्रया। पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि॥ देव सꣳस्फान सहस्रपोषस्येशिषे स नो रास्वाज्यानिꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्तिम्॥